पेक्षाया अप्ययुक्तत्वात् अशक्ता एव सर्वे पदार्थाः परस्परापेक्षया सामग्रीं जनयन्ति सा च शक्ता कार्य्यमुत्पादयति, तदप्ययुक्तं सामग्रीं प्रत्यपि शक्तत्वे पदार्थानामन्योन्यापेक्षा न युक्ता अशक्तत्वे च तदजनकत्वात् निष्फलाऽन्योन्यापेक्षेति अनपेक्षैव सर्वत्र स्यात्। मा भूत्तर्हि कस्यापि सहकार्य्यपेक्षेति चेत् न अनुभवविरोधात्। नचानुभवोभ्रान्तः, बाधाभावात्,। यद्यपि शक्तस्याशक्तस्य वाऽपेक्षा न युक्तेत्युक्तं तथापि शक्तत्वाशक्तत्वविनिर्मुक्तवस्तुमात्रस्य सहकार्य्यपेक्षा स्यात् न्यायस्यास्य त्वयाप्यङ्गीकार्य्यत्वात्। तथा हि कार्य्यसत्त्वेऽसत्त्वहानिः असत्त्वे चासंबद्धता कारणविशेषेण कार्य्यविशेषस्य समवायानिरूपणात् सर्वं सर्वस्मादुत्पद्येतेति परेण चोदिते सत्त्वासत्त्वसम्बद्धत्वासंबद्धत्वविशेषं विसृज्य नियतपूर्व्वभावि कारणं नियतोत्तरभावि कार्य्यमिति त्वया निरूपणीयम् अन्वयव्यतिरेकौ तत्र निरूपकौ स्त इति चेत् सहकारिण्यपि तौ स्त एव तस्मादस्त्येव सहकार्य्यपेक्षा तत्कृतस्योपकारविशेषश्चिन्त्यताम्। यत्त्वत्रैकदेशी मन्यते अन्वयव्यतिरेकसिद्धा भूम्युदकादिसहकारिणो बीजाख्ये कारणे विशेषमुच्छूनताख्यं जनयन्ति ततस्तद्बीजमङ्कुराख्ये कार्य्ये शक्तम् अन्यथानुपकारो भूम्यादिर्बीजेन नापेक्ष्येतेति, तदसत् बीजं स्वगतविशेषोत्पत्तौ शक्तं न चेत् सहस्रसन्निधानमपि न तं जनयेत् ततोनाङ्कुरोत्पादनेऽपि शक्ष्यति। अथ शक्तं तदापि यदि सहकारिसहकृतः विशेषान्तरं प्राप्योच्छूनतायां शक्नुयात् तदाऽनवस्था स्यात्। अथ तदप्राप्यैव तत्र शक्तं तदाङ्कुरेऽपि विशेषमन्तरेणैव शक्तं स्यात्। अथ मतम् अङ्कुरोत्पत्तिरुच्छूनत्वजन्मपूर्व्विका उच्छूनतोत्पत्तिस्तु सहकारिसन्निधिमात्रसाध्या तथैव दृष्टत्वादिति चेत् न तथासति शक्तिमता कारणेन स्वात्मन्यनुपकुर्वन्नपि सहकार्य्यपेक्ष्यत इति त्वयैव स्वमतव्याघात आपादितः स्यात्। तस्मान्नैकदेशिपक्षो युक्तिसहः। नन्वत एवास्मन्मतमादरणीयं न हि वयं तद्वत्कारणस्वरूपे सहकार्य्युपकारं ब्रूमः किं तर्हि क्षणिकान्मूलकारणादुत्पद्यमानं कार्य्यं सहकारिणमपेक्षते कार्य्यस्य बहुकारणसाध्यत्वादिति ब्रूमः। यद्यपि स्थायिकारणमतेऽप्येतावत् समानं तथापि तन्मते यावत् कारणसत्त्वं नैरन्तर्य्येण कार्य्योत्पत्तिर्दुर्व्वारा नियामकाभावात्। न च सहकारिसम्बन्धो नियामकः सम्बन्धस्यापि यावत्सम्बन्धिसत्त्वं भवितव्यत्वात्। न च तस्य सम्बन्धान्तरं नियामकम् अनवस्थापातात्। न च वाच्यं क्षणिकपक्षेऽपि न कारणसत्त्वक्षणे कार्य्यं जायते तयोर्यौगपद्यप्रसङ्गात् अन्यदा जन्माङ्गीकारे चानियमापत्तिरिति, कारणान्तरक्षणस्य कार्य्यनियामकत्वात् अतः क्षणिकत्वपक्ष एव श्रेयान्, नैवं सर्व्वत्र हि कार्य्यकारणभावो व्याप्तिबलेन निश्चेतव्यः तत्र किं त्वन्मते कार्य्यकारणव्याप्तिर्धूमाग्निव्यक्त्योः? उत तत्सन्तानयोः?। नाद्यः क्षणिकयोरन्वयव्यतिरेकबुद्धिद्वयकालावस्थानायोगात्। द्वितीयेऽङ्गारावस्थादग्नेर्धूमो जायेत तत्सन्तानपातित्वाविशेषात् काष्ठाभावात्तदा जन्म नेति चेत् तस्यापि स्वसन्ताने विद्यमानत्वात् नचाग्निकाष्ठयोः सम्बन्धाभावः सन्तानद्वयनित्यत्वेन तस्याप्यनिर्व्वाहत्वात्। सम्बन्धः सम्बन्धान्तरपूर्व्वकत्वात् न सदातन इति चेत् न अनवस्थापत्तेः त्रिचतुरकक्षाविश्रान्त्यभ्युपगमेन नानवस्था इति चेत् तर्हि स्थायिकारणाभ्युपगमेऽप्यनवस्थाया। सुपरिहरत्वान्नोक्तदोषः। ननु स्थिरकारण उपकारकत्वाङ्गीकारे यदि स्थायित्ववादी स्वमतमपि समीकुर्य्यात् तर्हि तदङ्गीकुर्म इति चेत् धूमकाष्ठयोः कार्य्यसहकारिणोरुपकार्य्योपकारकभावस्यान्वयव्यतिरेकसिद्धस्यावर्ज्जनीयत्वादन्वयव्यतिरेकयोश्चोपकार्य्योपकारकभावसाधकत्वं मूलकारणतत्कार्य्ययोरग्निधूमयोर्दृष्टं तस्मादुपकारके सहकारिणि मतद्वयेऽप्यपेक्षा समाना। तथा च क्षणिकपक्षे यथैकस्य वह्नेः सहकारिभेदात् देशभेदाच्च युगपदनेककार्य्यमभ्युपेयते वह्निः स्वदेशे वह्न्यन्तरं जनयति उपरिष्टाद्धूमम्, अधस्ताद्भस्म, पुरुषे विज्ञानञ्चेति तथा स्थायिपक्षेऽप्येकस्य कारणस्य कालभेदात् सहकारिभेदाच्चानेककार्य्यजनकत्वात् तत्र क्रमकारित्वं किं न स्यात्। नचैतावता क्षणिकस्थायिवादिनोर्मतसाङ्कर्य्यं शङ्कनीयं पूर्व्वस्य प्रतिकर्म्मव्यवस्थावादस्यान्ते निराकृतत्वात्। तदेवमतिदुष्टं क्षणिकविज्ञानवादिमतमुपेक्ष्य कूटस्थनित्यचैतन्ये सर्व्वमध्यस्ततया प्रतीयत इत्ययमेव वेदान्तवादोऽतिनिर्दोषत्वादादरणीय" इति।

आत्मतत्त्वविवेके च "अथ बाधकं भवदात्मनि क्षणभङ्गो वेत्यादिना" पञ्चविप्रतिपत्तीनामुद्भावितानां मध्ये प्रथमविप्रतिनिरासेऽस्य विस्तृतिर्दृश्या

**क्षणभङ्गुर** त्रि॰ क्षणं प्राप्य भङ्गुरः। क्षणमात्रेण विनाशशालिनि "यदि पुनरमी किमपि नाहमास्पदमस्ति किञ्चिदपि वस्तु स्थिरं, विश्वमेव क्षणभङ्गुरम्, अलीकं वेत्यवधारयेरन् न किञ्चिदपि कामयेरन्, न चाकामयमानाः